र्थो, माञ्जिष्ठं क्षत्रियो, हारिद्रं वैश्यः" आश्व०श्रौ० १,१९,८। "कात्यायन्यर्द्धवृद्धा या काषायवसनाऽधवा" अमरः। स्त्रियां ङीप्। तदन्तस्य रक्तार्थान्तत्वात् एकार्थविशेष्यस्त्रीलिङ्गे शब्दे परे पुंवत्। काषा यो कन्या यस्य काषायकन्यः

**काषायण** पु० अश्वा० गणे काश इत्यत्र काषेति पाठे गोत्रापत्ये फञ्। १काषगोत्रापत्ये शुक्लयजुर्वेदवंशान्तर्गते ऋषिभेदे। "काषायणात् काषायणः" शत ब्रा०१३,७,३,२७।

**काषायवासिक** पुंस्त्री काषाये वस्त्रे वासोऽस्यस्य ठन्। कीटभेदे स्त्रियां ङीष्। "सूचीमुखः कृष्णगोधा यश्च काषायवासिकः" सुश्रु०। कीटशब्दे विवृतिः।

**काषायिन्** पु० भूम्नि। कषायेण प्रोक्तमधीयते णिनि। कषायर्षिप्रोक्तशाखाध्यायिषु।

**काष्ठ** न० काशत्यनेन काश–क्थन् नेट् शस्य ष १अनलादेरिन्धनार्थे दारुणि "ससारमतिशुष्कं यत् सुषिमध्ये समेष्यति। तत् काष्ठं काष्ठमित्याहुः खदिरादिसमुद्भवम्" इत्युक्तलक्षणयुक्ते २दारुभेदे च। "काष्ठेन वा नखेन वा कण्डूयेत" शत०,ब्रा०,३,२,१, "यथा काष्ठञ्च काष्ठञ्च समेयातां महोदधौ। समेत्य च व्यपेयातां तद्वद्भूतसमागमः" भा०,शा०,८६४ श्लो० "तथाश्वानस्तृणकाष्ठञ्च सर्व्वं दिष्टवशे स्वां प्रकृतिं भजन्ति" भा०,आ०,८९अ०।

**काष्ठक** त्रि० काष्ठं विद्यतेऽस्य नड़ादि० छ कुक् च बिल्वादि० छमात्रस्य लुक्। काष्ठयुक्ते। २अगुरुचन्दने न शब्दमा० तस्य प्रशस्तकाष्ठवत्त्वात् तथात्वम्।

**काष्ठकदली** स्त्री काष्ठमिव कठिना कदली। (काठकला कदलीभेदे राजनि०। [ङीष्।

**काष्ठकीट** पुंस्त्री काष्ठे कीटः। घुणाख्ये कीटे हेम०स्त्रियां

**काष्ठकुट्ट** पुंस्त्री० काष्ठं कुट्टति कुट्ट–अण् उप० स०। (काठठोकरा)पक्षिभेदे त्रिका० स्त्रियां जातित्वेऽपि संयोगोपधत्वात् टाप्। [काष्ठमये कुद्दाले अब्धौ अमरः।

**काष्ठकुद्दाल** पु० काष्ठमयः कुद्दालः। नौकास्थमलघर्षणार्थे

**काष्ठजम्बू** स्त्री काष्ठप्रधाना जम्बूः। भूमिजम्बूवृक्षे राजनि०

**काष्ठतक्ष्** पु० काष्ठं तक्षति तक्ष–क्विप्। (छुतार)इतिप्रसिद्धे जातिभेदे। ण्वुल्। काष्ठतक्षकोऽप्यत्र स्त्रियां जातित्वात् ङीष्। काष्ठतक्षणकर्त्तृमात्रे त्रि०। स्त्रियां टाप् इति भेदः। [क्रमिभेदे हारा०।

**काष्ठतन्तु** पु० काष्ठे तन्तुरिव दीर्घत्वेनावस्थितत्वात्। काष्ठस्थे

**काष्ठदारु** पु० काष्ठप्रधानो दारुः। देवदारुवृक्षे राजनि०। तस्य शाखाबाहुल्ययोगेन काष्ठप्रधानत्वात् तथात्वम्।

**काष्ठद्रु** पु० काष्ठप्रधानोद्रुर्वृक्षः। पलाशवृक्षे राजनि० तस्य काष्ठतोऽपि पुष्पोद्गमात्तत्प्राधान्यात्तथात्वम्।

**काष्ठधात्रीफल** न० काष्ठमिव शुष्कं धात्रीफलम्। आमलके राजनि० तत्फलाभ्यन्तरे अष्टेः काष्ठस्येव शुष्कत्वात्तस्य तथात्वम्। [लायाम् राजनि०।

**काष्ठपाटला** स्त्री काष्ठमिव कठिना पाटला। सितपाट-

**काष्ठमठी** स्त्री क्षुद्रोमठः मठी काष्ठेन निर्म्मिता मठीव। चितायाम् त्रिका०। तस्याः काष्ठनिर्म्मितक्षुद्रमठाकारत्वात् तथात्वम्।

**काष्ठमय** त्रि० काष्ठात्मकं मयट्। १काष्ठात्मके २काष्ठतुल्यकठिनहृदये निर्दये च। "दृश्यन्ते कोचिदाभान्ति नराः काष्ठमया इव"। भा०,रा०,३४४,। [हारा०

**काष्ठमल्ल** पु० काष्ठं मल्ल इव यत्र। शवनिर्हरणे यानभेदे

**काष्ठमौन** न० काष्ठमिव मौनम्। इङ्गितेनापि स्वाभिप्रायाप्रकाशनरूपे मौने शब्दचि०

**काष्ठलेखक** पु० काष्ठं लिखति ण्वुल्। घुणाख्ये कीटे।

**काष्ठलौहिन्** पु० काष्ठञ्च लौहञ्च स्तोऽस्य। लौहयुक्ते काष्ठमये मुद्गरे त्रिका०

**काष्ठवल्लिका** स्त्री काष्ठमिव शुष्का वल्लिका। कटुकायां (कटकी) ख्याते वल्लीभेदे वैद्यकम् [शारिवाभेदे राजनि०

**काष्ठशारिवा** स्त्री काष्ठमिव शुष्का शारिवा। (अनन्तमूल)

**काष्ठा** स्त्री काश–क्थन् नेट् शस्य षः। १दिशि। "स राजपत्नीवदध आशु शुक्ल इवोडुपः। आपूर्व्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहम्"। २अष्टादशनिमेषात्मके २काले "त्वं मुहूर्त्तस्थितिस्त्वं च लवस्त्वं पुनः क्षणः "शुक्लस्त्वं बहुलस्त्वं च कला काष्ठा त्रुटिस्तथा" भा० आ०२५अ०। "कलाकाष्ठादिरूपेण परिणाम प्रदायिनि!" देवीमा०। ३सीमायाम् "परा हि काष्ठा तपसस्तया पुनः" कुमा०। ४स्थितौ "काष्ठां भगवतोध्यायेत् स्वनासाग्रावलोकनः" भाग० ३,१,२३, श्लो०। ५उत्कर्षे च अमरः "काष्ठागतस्नेहरसानुविद्धम्" कुमारः। काष्ठं प्राधान्येनास्त्यस्याम् अच्। ६दारुहरिद्रायां मेदि०। ७कश्यपपत्नीभेदे। "अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत्। अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला। मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः" इत्युपक्रम्य "अरिष्टायास्तु गन्धर्व्वाः काष्ठाया द्विशफेतराः" भाग० ६,६,२३, उक्तम्